Acc. 635

1— 119 Pages

माघ.
१

॥ॐ स्वस्ति श्रीगणेशाय नमः॥ श्रियः पतिः श्रीमति शासितुं जगज्जगन्निवासो वसुदे
वसद्मनि वसन्ददर्शावतरंतमंबराद्धिरण्यगर्भांगभुवं मुनिं हरिः १ गतं तिरश्चीन
मनूरुसारथेः प्रसिद्धमूर्ध्वज्वलनं हविर्भुजः पतत्यधोधाम विसारि सर्वतः किमेतदि
त्याकुलमीक्षितं जनैः २ द्विधाकृतात्मा किमयं दिवाकरो विधूमरोचिः किमयं
हुताशनः राकाशशांकः किमकालगोचरो रात्रिं विना सोपि विराजते कथं ३ चय
स्त्विषामित्यवधारितं पुरा ततः शरीरीति विभाविताकृतिं विभुर्विभक्तावयवं पु
मानिति क्रमादमुं नारद इत्यबोधि सः ४ नवानधोधो बृहतः पयोधरान्समूढक
र्पूरपरागपांडुरं क्षणं क्षणोत्क्षिप्तगजेंद्रकृत्तिना स्फुटोपमं भूतिसितेन शंभुना ५
दधानमंभोरुहकेसरद्युतीर्जटाः शरच्चंद्रमरीचिरोचिषं विपाकपिंगास्तुहिनस्थ
लीरुहो धराधरेंद्रं व्रततीततीरिव ६ पिशंगमौंजीयुजमर्जुनच्छविं वसानमेणा

राम
१

माघ० न्नमिता नमस्कृतौ हृतेकथंचित्तृणनीगणैर्बुधः अथाप्यपातामभिदेवकीसुतं सुतेन धा
२ तुश्चरणौ भुवस्तले १३ तमर्घ्यमर्घ्यादिकयादिपूरुषः सपर्यया साधु स पर्यपूजयत् ग्र
हानुपैतुं प्रणयादभीप्सवो भवंति नापुण्यकृतां मनीषिणः १४ न यावदेतावुदपश्यदु
त्थितौ जनस्तुषारांजनपर्वताविव स्वहस्तदत्ते मुनिमासने मुनिश्चिरं तनस्तावदभिन्य
वीविशत् १५ महामहानीलशिलारुचः पुरो निषेदिवान्कंसकृषः स विष्टरे श्रितो
२ दयाद्रेरभिसायमुच्चकैरचूचुरच्चंद्रमसोभिरामतां १६ विधाय तस्यापचितिं प्रसेदु
षः प्रकाममप्रीयत यज्वनां प्रियः ग्रहीतुमार्यान्परिचर्यया मुहुर्महानुभावा हि निता
न्तमर्थिनः १७ अशेषतीर्थोपहृताः कमंडलोर्निधाय पाणावृषिणाभ्युदीरिताः अ
घौघविध्वंसविधौ पटीयसीर्नतेन मूर्ध्ना हरिरग्रहीदपः १८ स कांचने यत्र मुनेरनु राम
ज्ञया नवांबुदश्यामतनुर्न्यविक्षत जिगाय जंबूजनितश्रियः श्रियं सुमेरुशृंगस्य त २

जिनमंजनद्युतिं सुवर्णसूत्राकलिताधरांबरां विडंबयंतं सितिवाससस्तनुं ७ वि
हंगराजो गरुडैर्विपीयते हिरण्मयो वीरुहवल्लितंतुभिः कृतोपवीतं हिमशुभ्रमुच्चकैर्घनं
घनांते तडितां गुणैरिव ८ निसर्गचित्रोज्वलसूक्ष्मपक्ष्मणा लसद्विशाखेदसितांगसंगि
नां चकासतं चारुचमूरुचर्मणा कुथेन नागेंद्रमिवेंद्रवाहनं ९ अजस्रमास्फालि
तवल्लकीगुणक्षतोज्वलांगुष्ठनखांशुभिन्नया पुरःप्रवालैरिव पूरितार्द्धया विभांत
मच्छस्फटिकाक्षमालया १० रणद्भिराघट्टनया नभस्वतः पृथग्विभिन्नश्रुतिमंड
लैःस्वरैः स्फुटीभवद्ग्रामविशेषमूर्छनामवेक्ष्यमाणं महतीं मुहुर्मुहुः ११ निवर्त्य सो
ऽनुव्रजतः कृतानतीनतींद्रियज्ञाननिधिर्नभःसदः समासदत्सादितदैत्यसंपदः पदं
महेंद्रालयचारुचक्रिणः ११ पतत्पतंगप्रतिमस्तपोनिधिः पुरोस्य यावन्न भुवि व्य
लीयत गिरेस्तडित्वानिव तावदुच्चकैर्जवेन पीठादुदतिष्ठदच्युतः १२ अथ प्रयत्नो

माघ० वरीयदर्शनं व्यनक्ति कालत्रितयेपि योग्यतां २६ जगत्यपर्याप्तसहस्रभानुना न यन्नि
३ यंतुं समभावि भानुना प्रसह्य तेजोभिरसंख्यतां गतैरदस्त्वया नुन्नमनुत्तमं तमः २७
कृतः प्रजाक्षेमकृता प्रजासृजा सुपात्रनिक्षेपनिराकुलात्मना सदोपयोगेपि गुरुस्त्व
मक्षयो निधिः श्रुतीनां धनसंपदामिव २८ विलोकनेनैव तवामुना मुने कृतः कृता
र्थोस्मि निबर्हितांहसा तथापि शुश्रूषुरहं गरीयसीर्गिरोथवा श्रेयसि केन तृप्यते २९
3 गतस्पृहोप्यागमनप्रयोजनं वदेति वक्तुं व्यवसीयते यया तनोति नस्तामुदितात्मगौ
रवो गुरुस्तवैवागम एष धृष्टतां ३० ब्रुवंतमेवं तमुवाच स व्रती न वाच्यमित्थं पुरुषो
त्तम त्वया त्वमेव साक्षात्करणीय इत्यतः किमस्ति कार्यं गुरु योगिनामपि ३१ उदी राम
र्णरागप्रतिरोधकं जनैरभीक्ष्णमक्षुण्णतयातिदुर्गमं उपेयुषो मोक्षपथं मनस्विनस्त्व ३
मग्रभूमिर्निरपायसंश्रया ३२ उदासितारं निगृहीतमानसैर्गृहीतमध्यात्मदृशा

दात्तदासनं १९ स तप्तकार्त्तस्वरभास्वरांबरः कठोरताराधिपलांछनच्छविः विदिद्युते वा
उवजातवेदसः शिखाभिराश्लिष्ट इवांभसां निधिः २० रथांगपाणेः पटलेन रोचिषामृषि चि२
त्विषः संवलिता विरेजिरे चलत्पलाशांतरगोचरास्तरोस्तुषारमूर्तेरिव नक्तमंशवः
२१ प्रफुल्लतापिच्छनिभैरभीषुभिः शुभैश्च सप्तच्छदपांसुपांडुभिः परस्परेण छुरिता
मलच्छवी तदेकवर्णाविव तौ बभूवतुः २२ युगांतकालप्रतिसंहृतात्मनो जगंति यस्यां
सविकाशमासत तनौ ममुस्तत्र न कैटभद्विषस्तपोधनाभ्यागमसंभवा मुदः २३
निदाघधामानमिवाधिदीधितिं मुदा विकाशं मुनिमभ्युपेयुषी विलोचने बिभ्रदधि
श्रितश्रिणी स पुंडरीकाक्ष इति स्फुटोभवत् २४ सितं सितिम्ना सुतरां मुनेर्वपुर्विसारि
भिः सौधमिवाथ लंभयन् द्विजावलीव्याजनिशाकरांशुभिः शुचिस्मितां वाचमवोच
दच्युतः २५ हरत्यघं संप्रति हेतुरेष्यतः शुभस्य पूर्वाचरितैः कृतं शुभैः शरीरभाजां भ

ल्हः१ ऊत्र=सर्पेष्टवासुरेभ्याहिरेते वैजयंती=२

माघ तमक्षमः क्रमेणापि दृष्टुं भुवनद्विषामसि तथापि वाचालतया युनक्ति मां मिथस्त्वदाभाष
७ णलोलुपं मनः ४० तदिंद्रसंदिष्टमुपेंद्र यद्वचः क्षणं मया विश्वजनीनमुच्यते सम
स्तकार्येषु गतेन धुर्यतामहिद्विषस्तद्भवता निशम्यतां ४१ अभूदभूमिः प्रतिपक्षज
न्मनां भियां तनूजस्तपनद्युतेर्दितेः यमिंद्रशब्दार्थनिषूदनं हरेर्हिरण्यपूर्वं कशिपुं
प्रचक्षते ४२ समत्सरेणासुर इत्युपेयुषा चिराय नाम्नः प्रथमाभिधेयतां भयस्य
४ पूर्वावतरस्तरस्विना मनस्सु येन द्युसदां न्यधीयत ४३ दिशामधीशांश्चतुरो यतः
सुरानपास्य तं रागहृताः सिषेविरे अवापुरारभ्य ततश्चला इति प्रवादमुच्चैरयशस्करं
श्रियः ४४ पुराणि दुर्गाणि निशातमायुधं बलानि शूराणि घनाश्च कंचुकाः स्वरूप राम
शोभैकफलानि नाकिनां गणैर्यमाशंक्य तदादि चक्रिरे ४५ स संचरिष्णुर्भुवनांतरे ७
षु यां यदृच्छयाशिश्रियदाश्रयः श्रियः अकारि तस्यै मुकुटोपलस्खलत्करैस्त्रिसं।

कथंचन वहिर्विकारं प्रकृतेः पृथग्विदुः पुरातनं त्वां पुरुषं पुराविदः ३३ निवेशया
मासिथ हेलयोद्धृतं फणाभृतां छादनमेकमोकसः जगत्त्रयैकस्थपतिस्त्वमुच्चकैरही
श्वरस्तंभशिरस्सु भूतलं ३४ अनन्यगुर्वास्तव केन केवलं पुराणमूर्तेर्महिमावगम्य
ते मनुष्यजन्मोपि सुरासुरान्गुणैर्भवान्भवोच्छेदकरैः करोत्यधः ३५ लघूकरिष्य
न्नतिभारभंगुराममूं किल त्वं त्रिदिवादवातरः उदूढलोकत्रितयेन सांप्रतं गुरुर्धरित्री
क्रियतेतरां त्वया ३६ निजौजसोज्जासयितुं जगद्द्रुहामुपाजिहीथा न महीतलं यदि
समाहितैरप्यनिरूपितस्ततः पदं दृशः स्याः कथमीश मादृशां ३७ उपप्लुतं पातुमदो म
दोद्धतैस्त्वमेव विश्वंभर विश्वमीशिषे ऋते रवेः क्षालयितुं क्षमेत कः क्षपातमस्कांड
मलीमसं नभः ३८ करोति कंसादिमहीभृतां वधाज्जनो मृगाणामिव यत्तव स्तवं ह
रेर्हिरण्याक्षपुरःसरासुरद्विपद्विषः प्रत्युत सा तिरस्क्रिया ३९ प्रवृत्त एव स्वयमुज्झि

माघ गुरुगृहंनरंनिनाय विप्राद्दिवसानि कौशिकः ५३ बृहच्छिलानिष्ठुरकंठघट्टनाद्विकी
५ र्णलोलाग्निकणंसुरद्विषः जगत्प्रभोरप्रसहिष्णुवैष्णवंनचक्रमस्याक्रमताधिकंध
रं ५४ विभिन्नशंखःकलुषीभवन्मुहुर्मदेनदंतीवमनुष्यधर्मणः निरस्तगांभीर्य
मपास्तपुष्पकः प्रकंपयामासनमानसंनसः ५५ रणेषुतस्यप्रहिताःप्रचेतसास
रोषहुंकारपराङ्मुखीकृताः प्रहर्तुरेवोरगराजरज्जवोजवेनकंठंसभयाःप्रपेदिरे।
5 ५६ परेतभर्तुर्महिषोमुनाधनुर्विधातुमुत्खातविषाणमंडलः हृतेपिभारेमहत
स्त्रपाभराद्उवाहदुःखेनभृशानतंशिरः ५७ स्पृशन्सशंकंसमयेशुचावपिस्थि
तःकराग्रैरसमग्रपातिभिः अघर्मघर्मोदकबिंदुमौक्तिकैरलंचकारास्यवधूरह
स्करः ५८ कलासमग्रेणगृहानमुंचतामनस्विनीरुत्कयितुंपटीयसा विलासि राम
नस्तस्यवितन्वतारतिंननर्मसाचिव्यमकारिनेंदुना ५९ विदग्धलीलोचितदं ५

ध्वंत्रिदशैर्दिष्टोनमः ४६ सदाच्छटाभिन्नघनेनविभ्रता नृसिंहसैंहीमतनुं तनुं त्वया स
मुग्धकांतास्तनसंगभंगुरैः सुरोविदारं प्रतिचस्कारेन रवैः ४७ विनोदमिच्छन्नथदर्पजन्म
नोरणेनकंडूः स्त्रिदशैः सममपुनः सरावणोनाम निकामभीषणं वभूव रक्षः क्षतरक्ष
णोदिवः ४८ प्रभुर्विभूषुर्भुवनत्रयस्यपः शिरोतिरागादृशमंत्रिकार्मुकः अतर्कयद्वि
घ्नमिवेष्टसाहसः प्रसादमेष्यासदृशोपिनाकिनः ४९ समुत्क्षिपन्यः पृथिवीभृतां व
रं वरप्रदानस्यचकार शूलिनः असह्यपाराद्रिसुतासंभ्रमस्वयंग्रहाश्लेषसुखेन
निःक्रयं ५० पुरीमवस्कंदलुनीहि नंदनं मुषाणरत्नानि हरामराङ्गनाः विगृह्यचक्रेण
सुचीक्रियावशीयइत्यमस्त्यास्य महर्निशं दिवः ५१ सलीलयातानि नभर्तुरभ्रमोर्न
चित्रमुच्चैःश्रवसः पदक्रमं अनुद्रुतः संयाति येनकेवलं वलस्य शत्रुः प्रशशंसशीघ्र
तां ५२ अशाक्तवन्सोढुमधीरलोचनः सहस्त्ररश्मेरिवयस्यदर्शनं प्रविश्यहेमाद्रि

माघ० मलैस्समापातवतुर्जलार्द्रपवनैर्न निर्ववौ ६६ अमानवंजातमजंकुलेमनोः प्रभाविनंभा
६ विनमंतमात्मनः मुमोचजानन्नपिजानकींनयः सदाभिमानैकधनाहिमानिनः ६७
स्मरत्यदोदाशरथिर्भवन्भवानमुंवनान्ताद्वनितापहारिणं पयोधिमाविद्धचलज्ज
लाविलंविलंघ्यलंकांनिकषाहनिष्यति ६८ अथोपपत्तिंछलनापरोपरामवाप्य
शैलूषइवैषभूमिकां तिरोहितात्माशिशुपालसंज्ञयाप्रतीयतेसंप्रतिसोप्यसःप
6 रैः ६९ सबालआसीद्वपुषाचतुर्भुजोमुखेनपूर्णेंदुनिभस्त्रिलोचनः युवाकराक्रां
तमहीभृदुच्चकैरसंशयंसंप्रतितेजसारविः ७० स्वयंविधातासुरदैत्यरक्षसामनु
ग्रहावग्रहयोर्यदृच्छया दशाननादीनभिराद्धदेवतावितीर्णवीर्यातिशयान्हसत्यसौ
७१ बलावलेपादधुनापिपूर्ववत्प्रबाध्यतेतेनजगज्जिगीषुणा सतीवयोषित्प्रकृतिः राम
सुनिश्चलापुमांसमभ्येतिभवांतरेष्वपि ७२ तदेनमुल्लंघितशासनंविधेर्विधेहिकी ६

तपत्रिकाविधित्सयानूनमनेनमानिना नजातुवैनायकमेकमुद्धृतंविषाणमन्यां
पिपुनः प्ररोहति ६० निशांतनारीपरिधानधूननस्फुटागसोप्यूरुषुलोलचक्षुषः
प्रियेणतस्यानपराधबाधिताः प्रकंपनेनानुचकंपिरेसुराः ६१ तिरस्कृतस्तस्य
जनाभिभाविनामुहुर्महिम्नामहसांमहीपतेः बभारबाष्पैर्द्विगुणीकृतंतनुस्तनूनपा
द्धूमवितानमाधिजैः ६२ नदीयमानंगघटाविघट्टितैः कटस्थलप्रोषितदा
नवारिभिः गृहीतदिक्कैरपुनर्निवर्त्तिभिश्चिराययाथार्थ्यमलंभिदिग्गजैः ६३ प
रस्यमर्माविधमुज्झतांनिजंद्विजिह्वतादोषमजिह्मगामिभिः तमिद्धमाराधयितुंसक
र्णकैःकुलैर्नभेजेफणिनांभुजंगता ६४ तपेनवर्षाःशरदाहिमागमोवसंतलक्ष्म्याशि
शिरःसमेत्यच प्रसूनक्लृप्तिंदधतःसदर्त्तवःपुरेस्यवास्तव्यकुटुंबितांययुः ६५ अ
भीक्ष्णमुष्णैरपितस्यसोष्मणःसुरेंद्रवंदीश्वसितानिलैर्यथा सचंदनोंभःकणको

माघ
७

अध्यासामासुरुत्तुंगहेमपीठानियान्यमी तैरूहे केशरिक्रांतत्रिकूटशिखरोपमा ५ गुरु
द्वयायगुरुणोरुभयोरथकार्ययोः हरिर्विप्रतिषेधंतमाचचक्षेविचक्षणः ६ द्योतितां
तः सभ्यैःकुंदकुड्मलाग्रदतःस्मितैः स्नापितेवाभवत्तस्यशुद्धवर्णासरस्वती ७ भवादृ
रामवसरप्रदानायवचांसिनः पूर्वरंगः प्रसंगायनाटकीयस्यवस्तुनः ८ करदीकृतभू
पालोभ्रातृभिर्जित्वरैर्दिशां विनाप्यस्मदलंभूष्णुरिज्यायैतपसः सुतः ९ उत्तिष्ठमा
7 नस्तुपरोनोपेक्ष्यःपथ्यमिछता समौहिशिष्टैराम्नातौवर्त्स्यंतावामयःसच १० नदू
येसात्वतीसूनुर्यन्मह्यमपराध्यति यत्तुदंदह्यतेलोकमतोदुःखाकरोतिमां ११ मम
तावन्मतमिदंःश्रूयतामंगवामपि ज्ञातसारोपि खल्वेकःसंदिग्धेकार्यवस्तुनि १२
यावदर्थपदांवाचमेवमादायमाधवः विरराममहीयांसःप्रकृत्यामितभाषिणः १३ राम
ततःसपत्नापनयस्मरणानुशयस्फुरा ओष्ठेनरामोरामोष्ठबिंबचुंबनचुंचुना १४ ७

नाशनिकेतनातिथीं शुभेतराचारविपाक्कमापदं विपादनीया हिंसतांमसाधवः ७३।
हृदयमरिवधोदयादुवामद्रढिमदधानुपुनः पुरंदरस्य घनपुलकपुलोमजाकुचाग्र।
द्रुतपरिरंभनिपीडनक्षमत्वं ७४ ओमित्युक्तवतोथ शार्ङ्गिण इति व्याहृत्य वाचं नभस्तस्मि
यं न्नुत्पतिते पुरः सुरमुनाविंदोः श्रीविभ्रति शत्रूणामनिशं विनाशपिशुनः कर्त्तुर्मिति
संपति व्योम्नीव भ्रुकुटीछलेन वदने केतुश्चकारास्पदं ७५ इति श्रीशिशुपालवधे
महाकाव्ये श्रंके माघस्य कवेः कृतौ नारदाभिगमनं नाम प्रथमस्सर्गः १ यियक्ष
माणेनाहूतः पार्थेनाथ मुरंद्विषन् अभिचैद्यं प्रतिष्ठासुरासीत्कार्यद्वयाकुलः १
गुरुकाव्यानुगां विभ्रच्चांद्रीमभिनभः श्रियं सार्द्धमुद्धवसीरिभ्यामथासावासदत्सदः २
जाज्वल्यमाना जगतः शांतये समुपेयुषी व्यद्योतिष्ट सभावेद्यामसौ नरशिखित्रयी
३ रत्नस्तंभेषु संक्रांतप्रतिमास्ते चकाशिरे एकाकिनोपि परितः पौरुषेयवृता इव ४

१ सहायाः साधनोपायाः विभागो देशकालयोः विपत्तेश्च प्रतीकारः सिद्धिः पंचांगमिष्यते १ प्रभावोत्साहमंत्रजाः शक्तयः २

भवंतु मे २४ विरोधिवचसो मूकान्वागीशानपि कुर्वते जडानप्यनुलोमार्थान्प्रवाचः
कृतिनां गिरः २५ षड्गुणाः शक्तयस्तिस्रः सिद्धयश्चोदयास्त्रयः ग्रंथानधीत्य व्याकर्तु
मिति दुर्मेधसोप्यलं २६ सर्वकार्यशरीरेषु मुक्त्वांगस्कंधपंचकं सौगतानामिवात्मान्यो
नास्ति मंत्रो महीभृतां २७ अनिर्लोलितकार्यस्य वाग्जालं वाग्मिनो वृथा, निमित्ताद
पराद्धेषोर्धानुष्कस्येव वल्गितं २८ मंत्रो योध इवाधीरः सर्वांगैः संवृतैरपि चिरं न
सहते स्थातुं परेभ्यो भेदशंकया २९ आत्मोदयः परज्यानिर्द्वयं नीतिरितीयती तदूरी
कृत्य कृतिभिर्वाचस्पत्यं प्रतायते ३० तृप्तियोगः परेणापि न महिम्ना महीयसां पूर्ण
श्चंद्रोदयाकांक्षी दृष्टांतोत्र महार्णवः ३१ संपदा सुस्थिरंमन्यो भवति स्वल्पयापि यः
कृतकृत्यो विधिर्मन्ये न वर्द्धयति तस्य तां ३२ समूलघातमघ्नंतः परान्नोद्यंति मानि
नः प्रध्वंसितांधतमसस्तत्रोदाहरणं रविः ३३ विपक्षमखिलीकृत्य प्रतिष्ठा खलु

रूपवेदनाविज्ञानसंज्ञानसंस्काराः॥ तत्र विषयसहितो रूपस्कंधः विज्ञानप्रवाहो वेदनास्कंधः अ. लविज्ञानस्कंधः वासनाप्रपंचः संस्कारस्कंधः एवं पंचस्कंधाः॥

संधिविग्रहयानासनद्वैधीभावसमाश्रयाः॥ साध्योत्साहसिद्धिः साध्यमंत्रसिद्धिः। साध्या प्रभुसिद्धिः ज्ञपस्या नवृद्धिः॥२ निकारमावेव

त्रिवसितामर्थीविदस्तत्स्यगुणप्रातिसंहृतां आपयन्पवनव्याधेगिरिमुन्नरपक्षतां १५ घू
र्णयन्मदिरास्वादमदपाटलितद्युतीः रेवतीवदनोच्छिष्टपरिपूतपुटे दृशौ १६ आश्लेष
लोलुपवधूस्तनकार्कश्यसाक्षिणीं म्लापयन्नभिमानोष्मवैनमालां मुखानिलैः १७
दधत्संध्यारुणव्योमस्फुरत्तारानुकारिणीः द्विषद्वेषोपरक्तांगसंगिनीः स्वेदविप्रुषः १८
प्रोल्लसत्कुंडलप्रोतपद्मरागदलत्विषा कृष्णोत्तरासंगरुचं विदधच्चौतपल्लवीं १९
कक्कापीकन्यावक्त्रांतर्वासलब्धाधिवासया मुखामोदं मदिरया कृतानुव्याधमुद्वमन्
२० जगाद वदनच्छद्मपद्मपर्यंतपातिनः नयन्मधुलिहः श्वैत्यमुदग्रदशनांशुभिः २१
ग्रंतकुलकं यद्वासुदेवेनादीनमनादीनवमीरितं वचसस्तस्य सपदि क्रिया केवलमु
त्तरं २२ नैतल्लघ्वपि भूयस्या वचो वाचामतिशय्यते इंधनौघधगप्यग्निस्त्विषा नात्येति
पूषणं २३ संक्षिप्तस्याप्यतोऽस्यैव वाक्यस्यार्थगरीयसः सुविस्तरतरा वाचो भाष्यभूता

माघ ंसः क्षमावाँल्लजेतैव योधिक्षिप्तः पराक्रमः परिभवे वैजात्यं सुरतोर्थ्येव ४४ माजीवन्यः परा
९ वज्ञादुःखदग्धोपिजीवति तस्याजननिरेवास्तु जननीक्लेशकारिणः ४५ पादाहतं यदुत्था
यमूर्द्धानमधिरोहति स्वस्थादेवावमानेपिदेहिनस्तद्वरंरजः ४६ असंपादयतः कं
चिदर्थंजातिक्रियागुणैः यदृच्छाशब्दवत्पुंसः संज्ञायैजन्मकेवलं ४७ तुंगत्वमितरा
नाद्रौनेदंसिंधावगाधता अलंघनीयताहेतुरुभयंतन्मनस्विनि ४८ तुल्येपराधेस्व
9 र्भानुर्भानुमंतंचिरेणयत् हिमांशुमाशुग्रसतेतन्म्रदिम्नःस्फुटंफलं ४९ स्वयंप्रणम
तेल्पेपिपरवायावुपेयुषि निदर्शनमसाराणांलघुर्बहुतृणंनरः ५० तेजस्विमध्ये
तेजस्वीदवीयानपिगण्यते पंचमःपंचतपसस्तपनोजातवेदसां ५१ अकृत्वाहेलया
पादमुच्चैर्मूर्द्धसुविद्विषां कथंकारमनालंबाकीर्त्तिर्द्यामधिरोहति ५२ अंकाधिरो राम
पितमृगश्चंद्रमामृगलांछनः केशरीनिष्ठुराक्षिप्तमृगयूथोमृगाधिपः ५३ चतुर ९

मा २

दुर्लभा अनीत्वा पंकतां धूलिमुदकं नावतिष्ठते ३४ ध्रियते यावदेकोपि रिपुस्तावत्कुतः
सुखं पुरः क्लिश्नाति सोमं हि सैंहिकेयोसुरद्विषां ३५ सखा गरीयान् शत्रुश्च कृत्रिमस्तौ
हि कार्यतः स्यातां मित्रौ मित्रे च सहजप्राकृतावपि ३६ उपकर्त्रारिणा संधिर्न मित्रे
णापकारिणा उपकारापकारौ हि लक्ष्यं लक्षणमेतयोः ३७ त्वया विप्रकृतश्चैद्यो रुक्मि
णीं हरता हरे बद्धमूलस्य मूलं हि महद्वैरतरोः स्त्रियः ३८ त्वयि भौमं गते जेतुमरौत्सीत्
स पुरीमिमां प्रोषितार्यमणं मेरोरंधकारस्तटीमिव ३९ आलप्यालमिदं बभ्रोर्यत्
स दारानपाहरत् कथापि खलु पापानामलमश्रेयसे यतः ४० विराद्ध एवं भवता
विराद्धा बहुधा च नः निर्वर्त्यतेरिः क्रियया स श्रुतश्रवसः सुतः ४१ विधाय वैरं साम
र्षे नरोरौ य उदासते प्रक्षिप्योदर्चिषं कक्षे शेरते तेभिमारुतं ४२ मनागनभ्यावृत्त्या
वा कामं क्षाम्यतु यः क्षमी क्रियासमभिहारेण विराध्यंतं सहेत कः ४३ अन्यदा भूषणं

वीवधो

धान्यादिप्राप्तिः आसारः स्यात्प्रसरणं वेगवृष्टौ सुहृद्बले प्रसारस्तृणकाष्ठादिः निरुद्धानि वारिताः १

माघ नीभृन्नभूरुहः ६३ निरुद्धवीवधासारप्रसारा गा इव व्रजं उपरुंधंतु दाशार्हाः पुरीं मा

१० हिष्मतीं द्विषः ६४ यजतां पांडवः स्वर्गमवत्विंद्रस्तपत्विनः वयं हनाम द्विषतः सर्वः

स्वार्थं समीहते ६५ प्राप्यतां विद्युतां संपत्संपर्कादर्करोचिषां शस्त्रैर्द्विषच्छिरः छेद

प्रोच्छलच्छोणितोक्षितैः ६६ इति संरंभिणो वाणीर्बलस्यालेख्यदेवताः सभाभित्ति

प्रतिध्वानैर्भयादन्ववदन्निव ६७ निशम्य ताः शेषगवीरभिधातुमधोक्षजः शिष्या

य बृहतां पत्युः प्रस्तावमादिशद्दृशा ६८ भारतीमाहितभरामथानुद्धतमुद्धवः तथ्यामु

तथ्यानुजवज्जगादाग्रे गदाग्रजं ६९ संप्रत्यसांप्रतं वक्तुमुक्ते मुशलपाणिना निर्धा

रितेर्थे लेखेन खलूक्त्वा खलु वाचिकं ७० तथापि यन्मय्यपि ते गुरुरित्यस्ति गौरवं त

त्प्रयोजककर्तृत्वमुपैति मम जल्पतः ७१ वर्णैः कतिपयैरेव ग्रथितस्य स्वरैरिव अ राम

नंता वाङ्मयस्याहो गेयस्येव विचित्रता ७२ बह्वपि स्वेच्छया कामं प्रकीर्णमभिधीयते ९०

र्थोपायसाध्यो हि रिपौ शंसत्वं मे पाक्षिया स्वेच्छया मां मज्वरं प्राज्ञः कौंभसापरिषिंचति ५४ सा
मवादाः सकोपस्यजनस्य प्रत्सुजदीपकाः मतमस्येवसहसा सर्पिषस्तोयादिंदवः ५५ गुणा
नार्मयथाजन्मादर्थं विज्ञापयंतिये अमात्यवंजनाराज्ञां दूष्यास्ते शत्रुसंज्ञिताः ५६
स्वशक्त्युपचये केचित्परस्य व्यसनेपरे यानमेके उदासीनंत्वामुत्यापयातिकवं ५७।
लिलंघयिषतो लोकानलंघ्यान लघीयसः याद्वांभोनिधीन् रुद्रे वेलेवं भवतः क्षमा
५८ विजयस्त्वाधिसेनायाः साक्षिमात्रेपदिश्यतां फलभाजे समीक्ष्योक्ते बुद्धेर्भोग इवा
त्मनि ५९ हतेहि डंव रिपुणा राज्ञि द्वैमातुरेयुधि चिरस्य मित्रव्यसनी सुदमो दमघोष
जः ६० नीतिरापदियद्गम्यः परस्तन्मानिनो ह्रियै विधुर्विधुंतुदस्येव पूर्णस्तस्योत्सवा
यमः ६१ अन्यदुच्छृंखलं सत्वमन्यच्छास्त्रनियंत्रितं सामानाधिकरण्यं हि तेजस्तिमि
रयोः कुतः ६२ इंद्रप्रस्थगमस्तावत्कारि मासंतु चेद्दयः अस्माकं ददंतिसानिध्यवाम

माघ यामुत्तुंगः प्रभुशक्तिं प्रथीयसीं प्रज्ञाबलबृहन्मूलः फलत्युत्साहपादपः ८३ बुद्धि
१२ शस्त्रः प्रकृत्यंगो घनसंवृतिकंचुकः चारेक्षणो दूतमुखः पुरुषः कोऽपि पार्थिवः ८४ ते
जः क्षमा वा नैकांतं कालज्ञस्य महीपतेः नैकमोजः प्रसादो वा रसभावविदः कवेः ८५
कृतापकारोऽपि परैरनाविःकृतविक्रियः असाध्यः कुरुते कोपं प्राप्ते काले गदो यथा
८६ मृदुव्यवहितं तेजो भोक्तुमर्थान्प्रकल्पते प्रदीपः स्नेहमादत्ते दशयाभ्यंतरस्थया
22 ८७ अनल्पत्वात्प्रधानत्वाद्वंशस्येवेतरे स्वराः विजिगीषोर्नृपतयः प्रयांति परिचा
रतां ८८ स्थायिनोऽर्थे प्रवर्त्तंते भावाः संचारिणो यथा रसस्यैकस्य भूयांसस्तथा
नेतुर्महीभृतः ८९ अप्यनारभमाणस्य विभोरुत्पादिताः परैः प्रयांति गुणतामर्थाः
शब्दा इव विहायसः ९० यातव्यपार्ष्णिग्राहादिमालायामधिकद्युतिः एकार्थतंतु राम
प्रोतायां नायको नायकायते ९१ नालंबते दैष्टिकतां न निषीदति पौरुषे शब्दार्थौ १२

धात्वार्यमापि त्रवसराः अंशभारं इः विवपतास्मृवार्यमन्यस्त्वृषाविष्णुरिति अथचरमान्तः प्रारिर्मित्रमरिमित्रंमित्रामित्रमतः परंतथा हरिः मित्रा
मित्रेचविजिगीषुःपरःस्मृतः इतिपुरोभावितः पृष्ठभाविनस्तुपार्ष्णिग्राहः स्मृतः पश्चादाक्रंदस्तदंतेरं आसारश्चानयोर्द्वयोः विजिगीषोस्तु पृष्ठतः २

मत्तु जितार्थसंबंधः प्रबंधो दुरुदाहरः ७३ महीयसीमपि घनामनल्पगुणकाल्पितां प्र
सारयंति निपुणाः श्रीमं वाचं पटीमिव ७४ विशेषाविदुषः शास्त्रं यत्तद्वोद्ग्राह्यते पुरः ,,
हेतुः परिचयस्थैर्ये वक्तुर्गुणनिकैव सा ७५ अत्योत्साहार्वजः स्वामीयतते तां धातुमा
त्मनि नौहि मूलमुदेष्यत्या जिगीषोरात्मसंपदः ७६ सोपधानां धियं धीराः स्थेयसीं ख
ट्वयंति ये तत्रां निशां निषण्णास्ते जानते जातु न भ्रमं ७७ स्पृशंति शरवत्तीक्ष्णाः स्तोक
मंतर्विशंति च बहुस्पृशोपि स्थूलेन स्थीयते बहिरश्मवत् ७८ आरभंते ल्पमेवाज्ञाः
कामं व्यग्रा भवंति च महारंभाः कृतधियास्तिष्ठंति च निराकुलाः ७९ उपायमास्थित
स्यापि नश्यंत्यर्थाः प्रमाद्यतः हंति नोपशयस्थोपि शयालुर्मृगयुर्मृगान् ८० उदेतुमत्य
जन्नीहां राजसु द्वादशस्वपि जिगीषुरेको दिनकृदादित्येष्विव कल्पते ८१ तंत्राव
पविदा योगैर्मंडलान्यधितिष्ठता सुनिग्रहा नरेंद्रेण फणींद्रा इव शत्रवः ८२ करप्रचे।

धार्मिकं धर्मशास्त्रेषु नीतिशास्त्रेषु पंडितान् क्लीबान्क्लीबप्रयुंजीत नीचान्नीचेषु कर्मसु तथा राम प्रयोक्तव्यं मा
पुर्व्वगुणानस्तु च दानं लुब्धेषु मेतत्वं शंकितेष्वेति निश्चयः २

मघा त्वामित्थमुत्थाप्य राजकं हंतजातमजातारैः प्रथमेनत्वयारिणा १०२ संभाव्यत्वामनु
१२ त्तिभरक्षमस्कंधं सुबांधवः सहायमध्वरधुरंधर्मराजो विवक्षते १०३ महात्मानोऽनु
गृह्णंति भजमानान्वैरीनपि सपत्नीः प्रापयंत्यब्धिं सिंधवो नगनिम्नगाः १०४ चिरा
द्रपि बलात्कारो बालीनः सिद्धये रिषु छंदानुवर्तिदुःसाध्याः सुहृदो विमनीकृताः ।
१०५ मन्यसे रिवधः श्रेयान्प्रीतये नाकिनामपि पुरोडाशभुजामिष्टमिष्टं कर्तुमलं
22 तरां १०६ अमृतं नाम यत्संतो मंत्रजिह्वेषु जुह्वति शोभैव मंदरक्षुब्धक्षुभिताम्भो
धिवर्णना १०७ प्रतीक्ष्यं तत्प्रतीक्षायै पैतृष्वस्रेय प्रतिश्रुतं सहिष्ये शतमागांसि सू
नोस्त इति यत्त्वया १०८ तीक्ष्णा नारुंतुदा बुद्धिः कर्म शांतं प्रतापवत् नोपतापि म
नः सोष्मं वागेका वाग्मिनः सतः १०९ स्वपंकृतप्रसादस्य तस्याल्पो भानुमानिव स राम १२
मयावधिमप्राप्य नीतामालंभवानपि ११० कृत्वाकृत्यविदस्तीर्थेष्वंतः प्रणिधयः ।

योनीजन्मावतारेचामित्रा ग्रहद्रशस्वापि ॥
उएपक्षेत्रे तस्यास्यात्मात्रे तीर्थे दर्शने प्यापि ।

सत्कारैरविवद्धयं विद्यान्नैपेक्षते ९२ वैद्यं एवमुपयुंजीत शत्रूपेक्षो रसायनं ; भवेन्न्यै
स्यैव मेगानेस्या स्मूनि वलवांतिच ९३ स्यानेश सुव नांश त्र्यावायामे वहिरंगीनां ।
अपथ्यावलम्बां रंभो निदानं क्षयसंपदः ९४ नदीशीतांबुचेष्टीनां भवांस्तमैवमेस्तमः
निरुं स्पर्शीनैकपदेयं उदान्नः स्वरान्निव ९५ मावेदियदंसावैको जेतव्यमेदिरा डिंति
राजयक्ष्मेव रोगाणं समूहः समहीभुजां ९६ संपादितफलस्तेन सपक्षः परभेदनः
कार्मुकेनेव गुणिना वाणः संधानमीप्सति ९७ येचान्येकालयमनशाल्वस्त्र कलिंदु ।
मादयः नमः स्वभावास्तेष्येन प्रदो वमनुपाययेतः ९८ उपजापः कृतस्तेन तानकोप
वतस्त्वपि आभुदीपायितांल्योपिसाग्नीनेधांनिवानिलः ९९ बृहत्सहायः कार्यान्तं क्षो
दीयानपिगच्छति संभूयांभोधिमभ्येति महानद्यानगापगा १०० तस्य मित्राण्यमित्रा
स्ते येच येचौभयेनृपाः अभियुक्तं त्वयैनं तेगंतारस्त्वामितोपरे १०१ मखावि ध्नायसक

माघ पालवधे महाकाव्ये नयवर्णनं नामद्वितीयस्सर्गः २ कौवेरदिग्भागमपास्यमा
१३ र्गमागस्त्यमुष्णांशुरिवावतीर्णः अपेतयुद्धाभिनिवेशसौम्यो हरिर्हरिप्रस्थमथप्र
तस्थे १ जगत्पवित्रैरपितंनपादैःस्प्रष्टुंजगत्पूज्यमयुज्यतार्कः यतोवृहत्पार्वण।
चंद्रचारुतस्यातपत्रंविभरांवभूवे २ मृणालसूत्रामलमंतरेणस्थितश्चलच्चा
मरयोर्द्वयंसः भेजेभितःपातुकसिद्धसिंधोरभूतपूर्वांरुचिमंवुराशेः ३ चित्रा
13 भिरस्योपरिमौलिभाजांभाभिर्मणीनामनणीयसीभिः अनेकधातुच्छुरिताश्मर
श्मेर्गोवर्द्धनस्याकृतिरन्वकारि ४ तस्योल्लसत्कांचनकुंडलाग्रप्रत्युप्तगारुत्मत
रत्नभासा अवापवाल्योचितनीलकंठपिच्छावचूडाकलनामिवोरः ५ तमंगदे
मंदरकूटकोटिव्याघट्टनोत्तेजनयामणीनां वहूपसादीप्तिवितानकेनचकासया राम
मासतुरुल्लसंती ६ निसर्गरक्तैर्वलयावनद्धताम्राश्मरश्मिच्छुरितैर्नखाग्रैः व्य १३

पदं विदांकुर्वन्नुमहतस्तलं विद्विषदंभसः १११ अनुत्सूत्रपदन्यासासद्वृत्तिः सन्निबं
धना शब्दविद्येवनोभातिराजनीतिरपस्पशा ११२ अज्ञातदोषैर्दोषज्ञैरुद्दूष्योभ
यवेतनैः भेद्याः शत्रोरभिव्यक्तशासनैःसामवायिकाः ११३ उपेयिवांसिकर्तारः पु
रीमाजातशात्रवीं राजन्यकान्युपायज्ञैरेकार्थानिचरैस्तव ११४ सविशेषोसुते
पांडोर्भक्तिंभवातिनन्वति वैरायितारस्तरलाःस्वयंमत्सरिणःपरे ११५ यदृहोत्म
विदोविपक्षमध्येसहसमत्राद्भिमुजोपिभूभुजःस्युः वलिपुष्टकुलादिवान्यपुष्टैःपृ
थगस्मादचिरेणभाविनोते ११६ सहजचापलदोषसमुद्धतश्चलितदुर्बलपक्षप
भत्र रिग्रहः तवदुरासदवीर्यविभावसौशलभतांलभतामसुहृद्गणः ११७ इतिविशाक
लिताप्रश्रिमोद्धवीवाचमेनामनुगतनयमार्गामर्गलांदुर्जयस्य जानितमुदमुदस्था
दुच्चकैरुच्छ्रितोरःस्थलानिपतानिवक्षःश्रीभुतांप्रभ्रुवान्तः ११८ इतिश्रीशिशु

माघ परिवव्रुरेनं १४ आकर्षिते वोर्द्रमति क्रशीयान्स्तुन्नतत्वात्कुचमंडलेन ननाम मध्योऽपि
१४ गुरुत्वभाजा नितांतमाक्रांत इवांगनानां १५ यां यां प्रियः प्रैक्षत कातराक्षी सा सा ह्रिया न
म्रमुखी बभूव निःशंकमन्याः सममाहितेर्ष्यास्तत्रांतरे जघ्नुरमुं कटाक्षैः १६ तस्यां
तसीसूनसमानभासो भ्राम्यन्मयूखावलिमंडलेन चक्रेण रेजे यमुनाजलौघः स्फुर
न्महावर्त इवैकबाहुः १७ विरोधिनां विग्रहभेददक्षा मूर्त्तेव शक्तिः क्वचिदस्खलंती
२४ नित्यं हरेः संनिहिता निकामं कौमोदकी मोदयति स्म चेतः १८ न केवलं यः स्वतया
मुरारेरनन्यसाधारणतां दधानः अत्यर्थमुद्वेजयिता परेषां नाम्नापि तस्यैव सुनंदकोऽ खड्गः
भूत् १८ न नीतमन्येन नतिं कदाचित्कर्णांतिकप्राप्तगुणाक्रियासु विधेयमस्याभि
वदंति कस्य शार्ङ्गं धनुर्मित्रमिवाद्वितीयः २० प्रवृद्धमंद्राम्बुदधीरनादः क्षीरार्णवाभ्य राम
र्णचरैकहंसः मंदानिलापूरकृतं दधानो निध्वानमम्फूयत पांचजन्यः २१ रराज १४

योत्तं तां द्यां पिसुरारिवक्षो विक्षोभजातस्य कृतापि नैरिवाँसौ ७ उभौ यदि व्योम्नि पृथक्प्रवा
हावाकाशगंगापयसः पतेतां तेनोपमीयेत तमालनीलमामुक्तमुक्तालतमस्य वक्षः ८
तेनोम्भसां सारमयः पयोधेर्दध्रे मणीर्दीधितिदीपिताशः अंतर्वसन्बिंबगतस्तदंगे सा
क्षादिवालक्ष्यत यत्र लोकः ९ मुक्तामयं सारसनावलंबि भातिस्म दामाप्रपदीनमस्य
अंगुष्ठनिष्ठ्यूतमिवोर्द्ध्वमुच्चैस्त्रिस्रोतसः संततधारमंभः १० सइंद्रनीलस्थलनीलमू
र्त्तीरराजत्कर्चूरपिशंगवासाः विसृत्वरैरंबुरुहांरजोभिर्यमस्वसुश्चित्रइवोदभारः
११ प्रसाधितस्यास्य मधुद्विषोभूदन्यैव लक्ष्मीरितियुक्तमेतत् वपुष्यशेषेखिललोक
कांता सानन्यकांता ह्युरसीतरातु १२ कपाटविस्तीर्णमनोरमोरःस्थलस्थितश्रीललन
स्य तस्य आनंदिताशेषजनाबभूव सर्वांगसंगिन्यपरैव लक्ष्मीः १३ दैत्याधिपमाण
मुपांचरवानामुपेयुषां भूषणतांक्षतेन प्रकाशकार्कश्यगुणोदधानाः स्तनौ तरुण्यः

माघ निरुध्यमाना यदुभिः कथंचिन्मुहुर्यदुच्चिक्षिपुरग्रपादान् ध्रुवं गुरून्मार्गरुधः करीन्द्रा
१५ न्नुल्लंघ्य गंतुं तुरगास्तदीषुः २८ अवेक्षितानायतवल्गमग्रे तुरंगिभिर्यत्ननिरुद्धवा
हैः प्रक्रीडितान्रेणुभिरेत्य तूर्णं निन्युर्जनन्यः पृथुकान्पथिभ्यः ३० दिदृक्षमाणाः
न४ प्रतिरथ्यमीयुर्मुरारिमारादनघं जनौघाः अनेकशः संस्तुतमप्यनल्पा नवं नवं प्रीति
रहो करोति ३१ उपेयुषो वर्त्म निरंतराभिरसौ निरुच्छ्वासमनीकिनीभिः रथ्यस्य तस्यां
पुरि दत्तचक्षुर्विधानवेदामास शनैर्नयाते ३२ मध्येसमुद्रं ककुभः पिशंगीर्या कुर्व
ती कांचनवप्रभासा तुरंगकांतामुखहव्यवाहज्वालेव भित्वा जलमुल्ललास ३३ कृ
तास्पदा भूमिभृतां सहस्रैरुदन्वदंभः परिवीतमूर्त्तिः अनिर्विदा या विदधे विधातुः
पृथ्वी पृथिव्याः प्रतियातनेव ३४ त्वष्टुः सदाभ्यासगृहीतशिल्पविज्ञानसंपत्प्रसर राम १५
स्य सीमा अदृश्यतादर्शतलामलेषु छायेव या स्वर्जलधेर्जलेषु ३५ रथांगभ

25

संपादकामिष्टसिद्धेः सर्वासु दिक्ष्वप्रतिघातमार्गं महारथः पुष्परथं रथांगी क्षिप्रं क्षपा
नाथ इवाधिरूढः २२ ध्वजाग्रधामा ददृशेथ शौरेः संक्रांतमूर्तिर्मणिमेदिनीषु फ
णावतस्त्रासयितुं रसायास्तलानि विक्षन्निव पन्नगारिः २३ पिपासतस्तस्य महीध्र
रंध्रभिदा पटीयान् पटहप्रणादः जलांतराणीव महार्णवौघः शब्दांतराण्यंतरयां
चकार २४ यतः स भर्ता जगतां जगाम धर्त्री धरित्र्याः फणिनां ततोधः महाभरा
भुग्नशिराः सहस्रसाहायकव्यग्रभुजं प्रसस्रे २५ अथोच्चकैस्तोरणसंगभंगभया
वनम्रीकृतकेतनानि क्रियाफलानीव सुनीतिभाजं सैन्यानि सोमान्वयमन्वयु
स्तं २६ श्यामारुणैर्वारणदानतोयैरालोडिताः कांचनभूपरागाः आनेमिमग्नैः शि
तिकंठपिच्छक्षोदद्युतश्चक्रिरे रथौघैः २७ न लंघयामास महाजनानां शिरांसि
नैवोद्धतिमाजगाम अचेष्टतोष्टापदभूमिरेणुः पादाहतो यत्सदृशं गरिम्णः २८।

माघ
१६

षारांशुमरीचिजालैर्विनिन्हुताः स्फाटिकसौधपंक्तीः आरुह्य नार्यः क्षणदासु यस्यां
नभोगता देव्य इव व्यराजन् ४३ कांतेंदुकांतोपलकुट्टिमेषु प्रतिक्षपं हर्म्यतलेषु य
त्र उच्चैरधःपातिपयोमुचोपि समूहमूहुः पयसां प्रणाल्यः ४४ रत्नौक्षिपापत्रांनि
शाम्य दीपान् जालागताभ्योधिगृहं गृहिण्यः तिम्युर्विडालेक्षणभीषणाभ्यो वैदूर्य
कुड्येषु शशीद्युतिभ्यः ४५ यस्यामतिश्लक्ष्णतया गृहेषु विधातुमालेख्यमशक्नुवं
तः चक्रुर्युवानः प्रतिबिंबितांगाः सजीवचित्रा इव रत्नभित्तीः ४६ निपातयंतीतर
ले विलोचने सजीवचित्रासु निवासभित्तिषु नवावधूर्यत्र जनाभिशंकया नगाढ
मालिंगति जीवितेश्वरं ४७ सावर्ण्यभाजां प्रतिमागतानां लक्ष्यैः स्मरापांडुतयां
गतानां यस्यां कपोलैः कलधौतधामस्तंभेषु भेजे मणिदर्पणश्रीः ४८ मुक्ता
गनीलोपलनिर्मितानां लिखेषु भासां गृहदेहलीनां यस्यामलिंदेषु न चक्रुरेव

26

राम
१६

त्रैभिनवं वरायं यस्याः पितैव प्रतिपादितायाः प्रेमार्णोपकंठे मुकुरैकभाजो रत्नावली
रंबुधिरीव बबंध ३६ यस्याश्चलद्वारिधिवारिवीचीच्छटोच्छलच्चंद्ररखकुलाकुलेन
वप्रेणापर्यंतचरोडुचक्रैः सुमेरुवप्रोऽन्वहमन्वकारि ३७ वाणिक्पथे प्रगकतानीय
त्रभ्रमागतैरंबुभिरंबुराशैः लोलैरलोलद्युतिभाजि तस्मिन् रत्नानि रत्नाकरतामं
वाप ३८ अभ्युतः कोमलरत्नराशीन्पयोनिधिः फेनापिनद्धभासः यत्रांतपेद
नुर्मिबोधितल्पं विस्तारयामास तरंगहस्तैः ३९ यत्नालमुत्तुंगतया विजेतुं दूरा
दुरस्थीपतं सागरस्य महोर्मिभिर्व्याहृतवान्द्विनार्थैः क्रीडार्द्दिवोभ्यासगतैर्विलिल्ये ४०
कुतूहलेनैव जवादुपेत्य प्राकारभित्त्यासहसा निविद्धः रसान्तरोदीर्द्रशमंबुवर्ष
व्याजेन यस्या बहिरंबुवाहः ४१ यदंगनारूपसरूपतायाः कंचिद्गुणं भेदकमिछ
तीभिः आराधितोऽद्धामनुरंकशोभिम्रक्केप्रजाः स्वाः सनिमेषचिह्नाः ४२ सुरांगु

माघ सितंमाँपस्फुटमंगनानां ५५ छन्नेष्वपिस्पष्टतरेषुयत्रस्वच्छानिनारीकुचमंडलेषु
१७ आकाशसाम्यंदधुरंबराणिननामतःकेवलमर्थतोपि ५६ यस्यामजिह्मामहतो
मपंकाःसीमानमत्यायतयोत्यजंतः जनैरजातस्खलनैर्नजातुद्वयेप्यमुच्यंतवि
नीतमार्गाः ५७ परस्परस्पर्द्धिपरार्ध्यरूपाःपौरस्त्रियोयत्रविधापवेधाः श्रीनि
र्मितप्राप्तगुणक्षतैकवर्णोपमावाच्यमलंममार्ज ५८ सुखंयदंतस्करणेनवृक्षाः
27 फलंतिकल्पोपपदास्तदेव अध्यूषुषस्तामभवज्जनस्ययाःसंपदस्तासमनसो
र्थ्यभूमिः ५९ कलादधानःसकलाःस्वभाभिरुद्भासयन्सौधसिताभिराशाः यां
रेवतीजानिरियेषहातुंनरोहिणीयोनचशेहिणीशः ६० बाणाहवव्याहतशंभुशक्तेः
रासत्तिमासाद्यजनार्दनस्य शरीरिणाजैत्रशरेणयत्रनिःशंकमूषेमकरध्वजेन राम
न ६१ निषेव्यमाणेनाशिवैर्मरुद्भिरध्यास्यमानाहरिणाचिराय उद्रश्मिरत्नांकुर १७

मुग्धांगनागोमयगोमुखानि ४८ गोपानसीभुक्षणमौस्थितानामालंविभिर्यत्र द्रु
किणांकलापैः हरिन्मणिश्यामतृणाभिरामैर्गृहाणि नीध्रैरिव यत्र रेजुः ४९ वृहत्तु
लैरप्यतुलैर्वितानमालावनद्धैरपि चावितानैः रेजे विचित्रैरपि या सचित्रैर्गृहैर्विशा
लैरपि भूरिशालैः ५० चित्रेंसपाकृत्रिमपक्षिपंक्तेः कपोतपालीषु निकेतनानां मा
र्जाररमप्यायतनिश्चलांगं यस्यां जनः कृत्रिममेवमेने ५१ क्षितिप्रतिष्ठोपि मुखारवि
दैर्वधूजनश्चंद्रमधश्चकार अतीतनक्षत्रपथानि यत्र प्रासादशृंगाणि वृथाध्यरो
हत् ५२ रम्याइतिप्राप्तवतीः पताकारागं विविक्ता इति वर्द्धयंतीः यस्यामसेवंत नम
ल २ द्वलीकाः समं वधूभिर्वलभीर्युवानः ५३ सुगंधितामप्रतियत्नपूर्वां बिभ्रंति यत्र
प्रमदाय पुंसां मधूनि वक्त्राणि च कामिनीनामामोदकर्मव्यतिहारमीयुः ५४ र
तांतरे यत्र गृहांतरेषु वितर्द्दिनिर्यूहविटंकनीडः रुतानि शृण्वन् वयसां गणोंतेवा

माघ स्याः प्रायेणनिष्क्रामतिचक्रपाणौनेष्टंपुरोद्वारवतीत्वमासीत् ६९ पारेजलंनी
१८ रनिधेरपश्यन्मुरारिरानीलपलाशराशीः वनावलीरुत्कलिकासहस्रप्रतिक्षणो
त्कूलितशैवलाभाः ७० लक्ष्मीभृतोंभोधितटाधिवासान्द्रुमानसौनीरदनील
भासः लतावधूसंप्रयुजोधिवेलंबहूकृतान्स्वानिवपश्यतिस्म ७१ आश्लिष्ट
भूमिंरसितारमुच्चैर्लोलद्भुजाकारबृहत्तरंगं फेनायमानंपतिमापगानामसावप
78 स्मारिणमाशशंके ७२ पीत्वाजलानांनिधिनातिगार्ध्याद्वृद्धिंगतेप्यात्मनिनैवमां
तीः क्षिप्ताइवेंदोःसरुचोधिनीरंमुक्तावलीराकलयांचकार ७३ साटोपमुर्वीम
निशंनदंतोयैःप्लावयिष्यंतिसमंततोमी तान्येकदेशान्निभृतंपयोधेःसोंभांसिमे राम
घान्पिबतोददर्श ७४ उद्धृत्यमेघैस्तत एव तोयमर्थंमुनीन्द्रैरिवसंप्रणीताः आ १८
लोकयामासहरिःपतंतीर्नदीःस्मृतीर्वेदमिवांबुराशिं ७५ विक्रीयंदिश्यानिध

धाम्नीसिंधावीक्षस्तमेणार्वमरावतीया ॥ ६२ ॥ स्निग्धांजनश्यामरुचिः सुवृत्तो वध्वा
इवांध्वंसितवर्णकांतेः ॥ विशेषकोवाविशेषकस्याः श्रियंस्त्रिलोकीतिलकः स एव
६३ तामीक्षमाणः स पुरंपुरस्तात्प्रापत्प्रतोलीमतुल्यप्रतापः ॥ वज्रप्रभोद्भासिसुरा
युधश्रीर्या देवसेनेवपरैरलंघ्या ॥ ६४ प्रजा इवांगादरविंदनाभेः शंभोर्जटाजूटतटा
दिवापः ॥ मुखादिवाथश्रुतयोविधातुः पुरान्निरीयुर्मुरजिद्ध्वजिन्यः ॥ ६५ श्लिष्य
द्भिरन्योन्यमुखाग्रसंगस्खलत्खलीनंहरिभिर्विलोलैः ॥ परस्परोत्पीडितजानुभा
गा दुःखेन निश्चक्रमुरश्ववाराः ॥ ६६ निरंतरालेपि विमुच्यमाने दूरंपथि प्राणभृतां
गणेन ॥ तेजोमहद्भिस्तमसेवदीपैर्द्विपैरसंबाधमयांबभूवे ॥ ६७ शनैरनीयंत र
यात्पतंतोरथ्याः क्षितिंहास्तिनखादखेदैः ॥ सयत्नसूतायत रश्मिभुग्नग्रीवाग्रसं
सक्तयुगैस्तुरंगैः ॥ ६८ बलोर्मिभिस्तत्क्षणहीयमानरथ्याभुजावलयैरिवास्य

माघ स्योदुरः सततंधृतानांश्रियांश्रिरविगताश्रियोजलनिधेश्चतदाभवदंतरंमहत् ८२ इति
१९ श्रीशिशुपालवधेमहाकाव्येश्र्यंकेद्वारवतीवर्णनं नामतृतीयःसर्गः ३ निःश्वा
सधूमंसहरत्नभाभिर्भित्वोत्थितंभूमिमिवोरगाणां नीलोपलस्यूतविचित्रधातुम
सौगिरिंरैवतकंददर्श १ गुर्वीरजस्रंदृषदःसमंतादुपर्युपर्यंबुमुचांवितानैः विंध्यायमा पर्व४
नंदिवसस्यभर्तुर्मार्गंपुनारोद्धुमिवोन्नमद्भिः २ क्रांतंरुचाकांचनवप्रभाजानवप्रभाजा
29 लभृतांमणीनां श्रितंशिलाश्यामलताभिरामंलताभिरामंत्रितुषट्पदाभिः ३ सह
स्रसंख्यैर्गगनंशिरोभिःपादैर्भुवंव्याप्यवितिष्ठमानं विलोच्चस्थानगतोष्मरश्मि न४
निशाकरंसाधुहिरण्यगर्भं ४ क्वचिज्जलापायविपांडुराणीधौतोत्तरीयप्रतिमछवी
नि अभ्राणिबिभ्राणमुमांगसंगविभक्तभस्मानमिवस्मरारिं ५ छायांनिजस्त्रीच राम
टुलालसानांमदेनकिंचिच्चटुलालसानांकुर्वाणमुत्पिंजलजातपत्रैर्विहंगमानांज १९

नान्युस्त्राणि द्वैप्यानि सांयात्रिकोत्तमलाभभाजः तरीषु तत्रत्यमर्थं फलभांडसंयात्रिका
नांवपत्तोभ्यनंदत् ७६ उत्पित्सवोंतर्नदभर्गुरुत्वैर्गरीयसा निश्वसितानि तेन प
यांसि भत्तागरूद्ध्वजस्य धूमानि वोर्ध्वि सिपिरेफणीद्राः ७७ तमांगतं वीक्ष्य यु
गांतबंधुमुत्संगशय्याशयमंबुराशीः प्रत्युज्जगामैव गुरुप्रमोदप्रसारितोत्तुंगतरं
गबाहुः ७८ उत्संगितांभः कणकोनभस्वानैंदवतः स्वेदलवान्ममार्ज तस्योधि
वेलं व्रजतोनुवेलमेलालतास्फालनलब्धगंधः ७९ उत्तालतालीवनसंभवत्त
समीरसीमंतितकेतकीकाः आमोदिरैलावणसैंधवीनां चम्रूचरैः कच्छभुवां प्रदे।
शाः ८० लवंगमालाकलितावतंसास्ते नालिकेरांतरपः पिबंतः आस्वादितार्द्रक्रमुकाः
समुद्रादभ्यागतस्य प्रतिपत्तिमीयुः ८१ तुरगशताकुलस्य परितः परमेकतुरंगजन्म
नः प्रमथितभूभृतः प्रतिपथं मथितस्य भृशं महीभृता परिचरतो बलानुजवल

माघ भिन्नवर्णा गरुडाग्रजेन सूर्यस्य रथ्याः परितः स्फुरंत्या रत्नैः पुनर्यत्र रुचा रुचं स्वामानीन्यि
२० रे वंशकरीरनीलैः १४ यत्रोज्झिताभिर्मुहुरंबुवाहैः समुन्नमद्भिर्न समुन्नमद्भिः वनं व
बाधे विषपावकोत्था विपन्नगानामविपन्नगानां १५ फलद्भिरुस्रांशुकराभिमर्शा
त्काशानवं धामपतंगकांतैः शशंस यः पात्रगुणाद्गुणानां संक्रांतिमाक्रांतगुणातिरे
कां १६ दृष्टोपि शैलः स मुहुर्मुरारेरपूर्ववद्विस्मयमाततान क्षणे क्षणे य
20 न्नवतामुपैति तदेव रूपं रमणीयतायाः १७ उच्चारणज्ञोथ गिरां दधानमुच्चारण
त्पक्षिगणास्तटीस्तं उत्कंधरं द्रष्टुमवेक्ष्य शौरिमुत्कंधरं दारुक इत्युवाच १८ आच्छा
दितायतदिगंबरमुच्चकैर्गामाक्रम्य संस्थितमुदग्रविशालशृंगं मूर्ध्नि स्फुरत्तुहिन
दीधितिकोटिमेनमुद्वीक्ष्य को न भुवि विस्मयते नगेशं १९ उदयति विततोर्ध्वरश्मि राम
रज्जावहिमरुचौ हिमधाम्नि याति चास्तं वहति गिरिरयं विलंबिघंटाद्वयपरिवारित २०

लजातपत्रैः ६ स्कंधाधिरूढोज्ज्वलनीलकंठानुवीरुहः श्लिष्टतनूनहींद्रैः प्रनर्तितानेकलतामुजायानूरुद्दाननं तानिव धारयंतं ७ विलंबिनीलोत्पलकर्णपूराः कपोलभित्तीरिव लोध्रगौरीः नवोलपालंकृतनैककताभाः सुचीरपः शैवालिनीर्दधानं ८ राजीवराजीवशलोलभृंगमुल्लंतमुल्लंनतिभिस्तरूणां कांतालकांताललनाः सुराणां रक्षोभिरक्षोभितमुद्वहंतं ९ मुदेमुरारेरमरैः सुमेरोरानीयस्योपचितस्य शृंगैः भ ५५
वंति नोद्दाममगीरंकवीनां स चक्रायसौंदर्यगुणाम्नघोघाः १० यतः परार्घ्यानिभृतानानैः प्रस्थैर्मुहुर्भूरिभिरुत्थितरत्नानि श्रीमत्प्रसारिद्विपपाणिकादजस्त्रं जयत्याहरत्नान्यमितानि लोकः ११ अरविंदतासन्नमुदयतापं रविंदधाने प्परविंदधाने भृंगावलिर्यस्य तटे निपीतरसानमज्जामरसानमत्ता १२ यत्राधिरूढेन महीरुहो स्वैस्तान्विद्रपुष्पासिसहस्त्रभाजा सुराधिपाधिष्ठितहास्तिमल्लीलांदधौ राजतगंडशैलः १३ वि

न्तोऽस्मीन्त्विलसंतिमेरोः समानवप्रेमणीसानुरागाः स्त्रीपश्यपत्नीसुरसुंदरीभिः समान
वप्रेमणीसानुरागाः २७ उच्चैर्महारजतराजीविराजितासौदुर्वर्णभित्तिरिहसांद्रसुधास
वर्णा अभ्येतिभस्मपरिपांडुरितस्मरारेरुद्वह्निलोचनललामललाटलीलां २८ अ
यमतिजरठाः प्रकामगुर्वीरलघुविलंबिपयोधरोपरुद्धाः सततमसुमतामगम्यरूपाः
परिणतदिक्करिकास्तटीर्बिभर्त्ति २९ धूमाकारंदधतिपुरः सौवर्णेवर्णेनाग्नेः सदृशि

तटेपश्यामी श्यामीभूताः कुसुमसमूहेलीनांलीनांश्रेणीमिहतरवोबिभ्राणाः ३०
व्योमस्पृशः प्रथयताकलधौतभित्तीरुन्निद्रपुष्पचणचंपकपिंगभासः सौमेरवीम
धिगतेननितंवशोभामेतेनभारतमिलावृतवद्विभाति ३१ रुचिराचित्रतनूरुहशा
लिभिर्विचलितैः परितः प्रियकव्रजैः विविधरत्नमयैः प्रतिभात्यसाववयवैरिव। राम
जंगमतांगतैः ३२ कुशेशयैरत्रजलाशयोषितामुदारमंतेकलभाविकस्वरैः प्रगी। २१

चारणेंद्रलीलां २० वहतियःपरितःकनकस्थलीःसहरितालसमाननवांशुकः अच
लएषभवानिवराजतेसहरितालसमाननवांशुकः २१ पाश्चात्यभागमिहसानुषुसं
न्निषण्णःपश्यंतिशांतमलसांद्रतरांशुजालं संपूर्णलब्धललनालपनोपमानमुत्संग
संगिहरिणस्यशशांकमूर्त्तेः २२ कृत्वापुंवत्पातमुच्चैर्भृगुभ्योमूर्ध्न्यावाणांजर्जरानिर्झ
रौघाः कुर्वंतिद्यामुत्पतंतःस्मरार्त्तस्वर्लोकस्त्रीगात्रनिर्वाणमत्र २३ स्थगयंत्यमूःश
मितचातकार्त्तस्वराजलदास्तडिज्जुलितकांतकार्त्तस्वराः जगतीरिहस्फुरितचारुचामी
कराःसवितुःक्वचित्कपिशयंतिचामीकराः २४ उत्क्षिप्तमुच्छ्रितसितांशुकरावलंबैरु
त्तंभितोडुभिरतीवतरांशिरोभिः श्रद्धेयनिर्झरजलव्यपदेशमस्यविष्वक्तटेषुपततीव
स्फुटमंतरिक्षं २५ एकत्रस्फटिकतटांशुभिन्ननीरानीलाश्मद्युतिभिदुरांभसोपरै
त्र कालिंदीजलजनितश्रियःश्रयंतेवैदग्धीमिहसरितःसुरापगायाः २६ इतस्त

माघ मेखलांतगाः सद्रत्नचित्रकटकासु वहन्ति तं वाः अस्मिन्भजंति घनकोमलगंडशैला नार्यो
२२ नुरूपमधिवासमधित्यकासु ४० अनतिचिरोज्झितस्य जलदेन चिरास्थितबहुबुद्बुद
स्य पयसोनुकृतिं विरलविकीर्णवज्रशकलासकलामिह विदधाति धौतकलधौतम
ही ४१ वर्जयंत्या जनैः संगमेकांततस्तर्कयंत्या सुखं संगमे कांततः योषयैष स्मरास
न्नतापांगया सेव्यतेनेकया सन्नतापांगया ४२ संसक्तकीचकवनस्खलितैकवाल
22 विच्छेदकातरधियश्चलितुं चमर्यः अस्मिन्मृदुश्वसनगर्भतदीयरंध्रनिर्यत्स्वरश्रुति
सुखादिव नोत्सहंते ४३ मुक्तं मुक्तागौरमिह क्षीरमिवाभ्रैर्वापीष्वंतर्लीनमहानीलशि
लासु शस्त्रीश्यामैरंशुभिराशु द्रुतमंभः छायामच्छामृच्छति नीलीसलिलस्य ४४ या राम
न ययौ प्रियमन्यवधूभ्यः सारतरागमनायतमानं तेन सहेह बिभर्ति रहः स्त्री सारतराग २२
मनायतमानं ४५ भिन्नेषु रत्नकिरणैः किरणेष्विहेंदोरुच्चावचैरुपगतेषु सहस्रसंख्यां

पतेःसिद्धगणोऽग्नयोषितामुदारमंतेकलभाविकस्वरैः ३३ आसादितस्तमसानीयते
र्नियोगादाकांक्षतःपुनरपक्रमणेनकालं पत्युस्त्विषामिहमहौषधयःकलत्रस्थानं
परैरनभिभूतममूर्भजंते ३४ वनस्पतिस्कंधनिषण्णबालप्रवालहस्ताःप्रमदाइवात्र
पुष्पेक्षणैर्लंभितलोचकैर्वामधुव्रतव्रातवृतैर्व्रतत्यः ३५ विहगाःकदंबसुरभाविहगाः
कलयंत्यनुक्षणमनेकलयं भ्रमयन्नुपैतिमुहुरभ्रमयंपवनश्चधूतनवनीपवनः
३६ विद्वद्भिरागमपरैर्विवृतंकथंचिच्छ्रुत्वापिदुर्ग्रहमनिश्चितधीभिरन्यैः श्रेयान्द्वि
जातिरिवहंतुमघानिदक्षंगूढार्थमेषनिधिमंत्रगणंविभर्ति ३७ बिंबोष्ठंबहुमनुते
तुरंगवक्त्रश्चुंबंतंमुखमिहकिन्नरंप्रियायाः श्लिष्यंतंमुहुरितरोऽपितंनिजस्त्रीमुत्तुंगस्त
नभरभंगभीरुमध्यां ३८ यदेतदस्मादनुतटंविभातिवनंततानेकतमालतालं नपु
ष्पितात्रस्थगितार्करश्मावनंततानेकतमालतालं ३९ दंतोज्ज्वलासुविमलोपल

माघ
२३
23

णीकरचारुभिर्विचित्रैरत्र स्यन्दनमणीजन्मभिर्मयूखैः विस्मेरान्गगनसदः करोत्यमु
ष्मिन्नाकाशे रचितमभित्तिचित्रकर्म ५३ समीरशिशिरः शिरःसु वसतां सतां जवनिका नि
कामसुखिनां बिभर्ति जनयन्नयं मुदमपामपायधवला बलाहकततीः ५४ मैत्र्यादि
चित्तपरिकर्मविदो विधाय क्लेशप्रहाणमिह लब्धसबीजयोगाः ख्यातिं च सत्त्वपुरुषान्य
तयाधिगम्य वाञ्छन्ति तामपि समाधिभृतो निरोद्धुं ५५ मरकतमयमेदिनीषु भानोस्तरुवि
टपान्तरपातिनो मयूखाः अवनतशितिकंठकंठलक्ष्मीमिह दधति स्फुरिताणुरेणुजालाः
५६ या बिभर्ति कलवल्लकीगुणस्वानमानमतिकालिमालया नात्र कांतमुपगीत
या तया स्वानमानमतिकालिमालया ५७ सायं शशांककिरणाहतचंद्रकांतनिष्यंदिनी
रनिकरेण कृताभिषेकाः अर्कोपलोल्लसितवह्निभिरह्नि तप्तास्तीव्रं महाव्रतमिवात्र चरं राम
ति वप्राः ५८ एतस्मिन्नधिकपयःश्रियं वहंत्यः संक्षोभं पवनभुवा जवेन नीताः वाल्मी २३

दोषापिनूनमहिमांशुरसौकिलेतिव्याकोशकोकनदतांदधतेनलिन्यः ४६ अपशं
कमंकपरिवर्त्तनोचिताश्चलिताःपुरःपतिमुपैतुमात्मजाः अनुरोदतीवकरुणेनपत्रि
णांविरुतेनवत्सलतयैषनिम्नगाः ४७ मधुकरविटपानमितास्तरुपंक्तीर्विभ्रतोस्यावि
टपानमिताः परिपाककपिशंगलतारजसारोधश्चकास्तिकपिशंगलता ४८ प्राग्भाग
तःपतदिहेदमुपत्यकासुशृंगारितायतमहेभकराभमंभः संलक्ष्यतेविविधरत्नकरानु
विद्धमूर्ध्वप्रसारितसुराधिपचापचारु ४९ दधातिचविकसद्विचित्रकल्पद्रुमकुसुमैरभि
गुंफितानिवैताः क्षणमलघुविलंबिपिच्छदाम्नःशिखरशिखाःशिखिशेखरानमुष्य ५०
सवधूकाःसुखिनोस्मिन्ननवरतममंदरागतामरसदृशः नासेवंतेरसवन्ननवरतममंद
रागतामरसदृशः ५१ आच्छाद्यपुष्पपटमेषमहांतमंतरावर्तिभिर्गृहकपोतशिरोधराभैः
स्वांगानिधूमरुचिमागुरवींदधानैर्धूपायतीवपटलैर्नवनीरदानां ५२ अन्योन्यव्या

तस्तटे विकचवारिजांबूनदैर्विनोदितदिनक्लमाः कृतरुचश्च जांबूनदैः निषेव्य मधुमा
धवाः सरसमत्र कादंबरं हरंति रतये रहः प्रियतमांगकादंबरं ६६ दर्प्पणनिर्मलासुप
तिते घनतिमिरमुषि ज्योतिषि रौप्यभित्तिषु पुरः प्रतिफलति मुहुः व्रीडमसंमुखोपि रम
णैरपहृतवसनाः कांचनकंदरासु तरुणीरिह नयति रविः ६७ अनुकृतशिखरौघश्री
भिरभ्यागतेसौ त्वयि सरभसमभ्युत्तिष्ठतीवाद्रिरुच्चैः द्रुतमरुदुपनुन्नैरुन्नमद्भिः सहेलं
हलधरपरिधानश्यामलैरंबुवाहैः ६८ इति श्रीशिशुपालवधे महाकाव्ये श्र्यंके रै
वतवर्णनं नाम चतुर्थस्सर्गः ४ इत्थं गिरः प्रियतमा इव सोव्यलीकाः शुश्राव सू
ततनयस्य तदा व्यलीकाः रंतुं निरंतरमियेष ततोवसाने तासां गिरौ च वनराजिपटं व
साने १ तं स द्विपेंद्रतुलितातुलतुंगशृंगमभ्युल्लसत्कदलिकावनराजिरुच्चैः विस्ता
ररुद्धवसुधोन्वचलं चचाल लक्ष्मीं दधत्प्रतिगिरेरलघुर्बलौघः २ भास्वत्करव्य

केररहितरामलक्ष्मणानांसाधर्म्यंदधातिगिरांमहासरस्यः ५९ दरमुकुर्मुदितैकलभैरवः
प्रतिदिशंक्रियतेकलभैरवःस्फुरतिचानुवनंचमरीचयःकनकरत्नभुवांचमरीचयः ६०
त्वक्सारंध्रपरिपूरणलब्धगीतिरस्मिन्नसौमृदितपक्ष्मलरल्लकांगः कस्तूरिकामृग
विमर्दसुगंधिरेतिरागीवसक्तिमधिकांविषयेषुवायुः ६१ प्रीत्यैयूनांव्यवहिततपनाः
प्रौढध्वांतंदिनमिहजलदाः दोषामन्यंविदधतिसुरताक्रीयासक्लममपामपटवः ६२ म ३१५
ग्नोनिवासोयमिहास्यपुष्ट्यैःसदानतोयेनविषाणिनागः तीव्राणितेनोत्कृतिकोपितोसौ
सदानतोयेनविषाणिनागः ६३ प्रालेयशीतमचलेश्वरमीश्वरोपिसांद्रेभचर्मवस
नावरणोधिशेते सर्वर्तुनिर्वृतिकरेनिवसन्नुपैतिनद्वंद्वदुःखमिहकिंचिदकिंचनोपि
६४ नवनगवनलेखाश्याममध्याभिरामिः स्फटिककटकभूमिर्नाटयत्येषशैलः अहि
परिकरभाजोभास्मनैरंगरागैरधिगतधवलिम्नःशूलपाणेरभिख्यां ६५ दधद्भिरभि

माघ तवर्त्मसु विचक्रमिरे महाश्वाः शैलस्य दर्दुरपुटानिव वादयंतः ९ तेजोनिरोधसमतावहि
२५ तेन यंत्रा सम्यक्कशात्रयविचारवता नियुक्तः आराट्टजश्चटुलनिष्ठुरपातमुच्चैश्चित्रं चका
रपदमर्द्धपलायितेन १० नीहारजालमलिनः पुनरुक्तसांद्राः कुर्वन्वधूजनविलोचनपक्ष्म
मालाः क्षुण्णः क्षणं यदुबलैर्दिवमाततान्सुः पांसुर्दिशांमुखमतुत्थयदुत्थितोद्रेः ११ उच्छि
25 द्य विद्विष इव प्रसभं मृगेंद्रानिंद्रानुजानुचरभूपतयोध्ववासाः वन्येभमस्तकनिखातनखाग्र
मुक्तमुक्ताफलप्रकरभांजि गुहागृहाणि १२ बिभ्राणमायवकुलयावकपंकपिंगापिछावचूल
मनुमाधवधामजग्मुः चंचत्पटप्रचटुलाहिपताकयान्ये स्रोतः समागमगुरंगाश्रनकेतुमस्मा
१३ छायामपास्य महतीमपि वर्त्तमानामागामिनीं जगृहिरे जनतास्तरूणां सर्वो हि नोपगत
मप्यपचीयमानं वर्द्धिष्णुमाश्रयमनागतमप्युपैति १४ अग्रेगतेन वसतिं परिगृह्य रम्या राम
मापात्य सैनिकनिराकरणाकुलेन यातोन्यतः प्लुतकृतस्वरमाशुदूरादुद्बाहुना जुहुविरे मु २५

तिकरोत्त्रासितांवरांताः सापत्रपाइव महाजनदर्शनेन संविग्नुरंवराविकाशीचमूसमुत्थैष्ठ्वीर
जंःकरभकंठकडारमाशाः ३ आवर्जिनः शुभफलप्रदप्युक्तियुक्ताः संपन्नदेवमणयोऽन्तरंघ्रभा
गाः अशर्वप्पधुर्वसुमतीमतिरोचमानास्तूर्णपयोधयइवोर्मिभिरा पतंतः ४ आरक्षम
न्नमवमत्यपक्ष्णिशितायमेकः पलायतजवेन कृतार्त्तनादः अन्यः पुनर्मुहुरुदञ्चवतास्तभारम
न्योन्यतः पार्थिवता विभितामिभोक्ष्णो ५ आपतमेक्षतजनस्फुटलाग्रपादंगचंक्तनमुच्चालितचा
मरचारुमश्वं नागं पुनर्मृदुसलीललनिमीलिताक्षं सर्वेः प्रियः खलुभवत्यनुरूपचेष्टः ६ त्रस्तः
समस्तजनहासकरः करेणोस्तावतवरः प्रखरमुल्लुलयांचकार यावच्चलासनविलोलनितंब
विंवविस्रस्तवस्त्रमवरोधवधूः पपात ७ शैलोपशल्यनिपतद्रथनेमिधारानिष्पिष्टनी
स्तुराशीलातलचूर्णगर्भाः भूरेणवोनभसि वद्धपयोदचक्राश्चक्रीवदंगरुहधूम्ररुचो विस
स्रुः ८ उद्धन्तकराग्रशकलेषुखुराभिघातात् भूमीसमायतशिलाफलकांचितेषु पर्यं

माघ २६ डुपटकांतरलीयमानमंदानिलप्रशमितश्रमघर्मतोयैः दूर्वाप्रतानसहजास्तरणेषु भेजे
निद्रासुखं वसनसद्मसु राजदारैः २२ प्रस्वेदवारिसविशेषविषक्तमंगे कूर्पासकं क्षततन
त्वक्षतमुत्क्षिपंती आविर्भवद्घनपयोधरबाहुमूला शातोदरी युवदृशां क्षणमुत्सवोभूत्
२३ यावत्स एव समयः सममेव तावदव्याकुलाः पटमयान्यभितो वितत्य पर्याप्तनक्कार्य
26 कलोकमगण्यपण्यपूर्णापणा विपणिनो विपणीर्विभेजुः २४ अल्पप्रयोजनकृतोरुतर
प्रयासैरुद्गूर्णलोष्टलगुडैः परितोनुबद्धं उद्भ्रांतमुद्गुत मनोकहजालमध्यादन्यः शश
शुणाम् अनल्पमवल्लवाप २५ त्रासाकुलः परिपतन् परितो निकेतान् पुंभिर्न कैश्चिदपि
धन्विभिरन्वबंधि तस्थौ तथापि न मृगः क्वचिदंगनाभिराकर्णपूर्णनयनेषुहतेक्षणश्रीः
२६ आस्तीर्णतल्परचितावसथः क्षणेन वेश्याजनः कृतनवप्रतिकर्मकाम्यः खिन्नान राम
खिन्नमतिरापततो मनुष्यान् प्रत्यग्रहीच्चिरगनीविट्ट्इवोपचारैः २७ सस्नुः पयः पपुरने २६

कुरात्मवर्ग्याः १५ सिक्ता इवामृतरसेन मुहुर्जनानां क्रांतिछ्छिदो नगवनस्य तयस्तदानींशा
खावसक्तवसनाभरणाभिरामाः कल्पद्रुमैः सह विचित्रफलैर्विरेजुः १६ यानाज्जनः परिज
नैरवतार्यमाणा राज्ञीर्नरापनयनाकुलसौविदल्लाः स्रस्तावगुंठनपटक्षणलक्ष्यमाणव
क्त्राश्रियः सभयकौतुकमीक्ष्यतेस्म १७ कंठावसक्तमृदुबाहुलतास्तुरंगाद्राजावरोधनवधू
रवतारयंतः आलिंगनान्यधिकृताः स्फुटमापुरेव गंडस्थलीः शुचितया न चुचुंबुरासां १८
दृष्टैव निर्जितकलापभरामधस्ताद्व्याकीर्णमाल्यकबरींकबरीं तरुण्याः प्रादुद्रुवत्सपदि चं
द्रकवाननुमाया त्संघर्षिणा सह गुणाभ्यधिकैर्दुरासं १९ शोचिष्णुकांचनचयांशुपिशंगि
ताशा वंशध्वजैर्जलदसंहतिमुल्लिखंतः भूभर्तुरायतनिरंतरसंनिविष्टाः पादा इवाभिबभु
रावलयो रथ्यानां २० छाया विधायिभिरनुज्झितभूतिशोभैरुच्छ्रायिभिर्बहलपाटलधा
तुरागैः दूष्यैरिव क्षितिभृतां द्विरदैरुदारतारावलीविरचनैर्व्यरुचन्निवासाः २१ उत्क्षिप्तकं

माघ रदकुंभविघूर्णितचेताः स्तंबेरमः परिणिनंसुरसावुपेतो धिद्धैरगपतेस्ससंभ्रममेवमेका।
२७ ३४ कीर्णंशनैरनुकपोलमनेकपानां हस्तोद्विगाढमदतापरुजः शमाय आकर्णमुल्लसि।
तमंबुविकाशिकाशनीकाशमापसमतांसितचामरस्य ३५ गंडूषमुज्झितवता पयसः स
रोषं नागेन लब्धपरवारणमारुतेन अंभोधिरोधसि पृथुप्रतिमानभागरुद्धोरुदंतमुश
27 लप्रसरं निपेते ३६ दानं ददत्यपि जलैः सहसाधिरूढे को विद्यमानगतिरासितुमुत्सहे
त यद्दंतिनः कटकटाहतटान्मिमंक्षोर्मंक्षूदपाति परितः पटलैरलीनां ३७ अंतर्जलौघ
मवगाढवतः कपोलौ हित्वा क्षणं विततपक्षतिरंतरिक्षे द्रव्याश्रयेष्वपि गुणेषु रराज नी
लो वर्णः पृथग्गत इवालिगणो गजस्य ३८ संसर्पिभिः पयसि गैरिकरेणुरागैरंभोजग
र्भरजसांगनिषंगिणाञ्च क्रीडोपभोगमनुभूय सरिन्महेभावन्योन्यवस्त्रपरिवर्तमिवव्य राम
धत्तां ३९ यां चंद्रकैर्मदजलस्य महानदीनां नेत्रश्रियं विकसतो विदधुर्गजेंद्राः तांप्रत्यव २७

निजुरंबराणीजगुर्विशंधनविकाशीविशप्रसूनाः सैन्याःश्रियामनुपभोगनिरर्थकत्वदो
षप्रवादममजुर्नगनिम्नगानां २८ नाभीहृदैःपरिगृहीतरयाणिनिम्नैःस्त्रीणांबृहज्जघनसे
तुनिवारितानि जग्मुर्जलानिजलमुडुकवाद्यवल्गुवल्गद्घनस्तनतटस्खलितानिमंदं २९
श्रालोलपुष्करमुखोल्लसितैरभीक्ष्णमुक्षांबभूवुरभितोवपुरंबुवर्षैः खेदायतश्वसित
वेगनिरस्तमुग्धमूर्द्धन्यरत्ननिकरैरिवहास्तिकानि ३० येपक्षिणःप्रथममंबुनिधिंगतास्ते
येपींद्रपाणिजुलितायुधलूनपक्षाः तेजग्मुरद्रिपतयःसरसीर्विगाढुमाक्षिप्तकेतुकुथ
सैन्यगजच्छलेन ३१ आत्मानमेवजलधेःप्रतिबिंबितांगमूर्मौमहत्यभिमुखापतितंनिरी
क्ष्य क्रोधादधावदपभीरतितूर्णमन्यनागाभियुक्तइवयुक्तमहोमहेभः ३२ नादातुमन्य
करिमुक्तमदांबुतिक्तंधूतांकुशेननविनीतमपीतमंभः स्वेगजेनसरितःसरुषावतारे
रिक्तोदपात्रकरमात्तविरंजनौघः ३३ पंथानमाशुविजहीहिपुरःस्तनौतेपश्यन्प्रतीहि

माघ शकलावलीकोमलेनकंठेगुणत्वमालीनांवलयेनभेजे ४५ निर्धूतवीतमपिवालकमु
२८ ल्ललंतंयंताक्रमेणपरिखांतनतर्जनाभिः शिक्षावशेनशनकैर्वशमानिनाय शास्त्रेषु
निश्चितधियांक्वनासिद्धिमेति ४६ स्तंभंमहांतमुचितंसहसामुमोचदानंददावतितरांसर
सामग्रहस्तः वध्नापराणिपरितोनिगडान्यलावीत्स्वांतंचमुज्ज्वलमवापकरेणुराजः ४७
28 जग्मेजनैर्मुकुलिताक्षमनाददानेसंरब्धहस्तिपकनिष्ठुरचोदनाभिः गंभीरवेदिनिपुरः
कवलंकरींद्रेमंदोपिनामनमहाननवग्रहसाध्यः ४८ क्षिप्तंपुरोनजगृहेमुहुरिक्षुकांडं
नापेक्षतेस्मनिकटोपगतांकरेणुं सस्मारवारणपतिःपरिमीलिताक्षंस्वेच्छाविहारवन
वासमहोत्सवानां ४९ दुःखेनभोजयितुमाशयिताशशाकत्तुंगाग्रकायमनमंतमम्
नादरेण उत्क्षिप्तहस्ततलदत्तविधानपिंडस्नेहस्नुतिस्नापितवाहुरिभाधिराजं ५० प्रु राम
ह्लांशुकोपरचितानिनिरंतरंभिर्वेश्मानिराश्मिविततानिनराधिपानां चंद्राक्तानि २८
रा

पराविलं विनमुन्नरंत्रोधोत्तंगलग्ननववनीलपयोजपत्रैः ४० प्रत्यन्यदंतिनिशितांकुशदू
रभिन्ननिर्याणनिर्यदसृजं चलितं निषादी रोद्धुं महेभमपरिव्रढिमानमागादाक्रांतितो न
वशमेति महान्परस्य ४१ स व्योपीसानुनयमाकलनाय यंत्रानीतेन वन्यकरिदानकृता
धिवासः नाभाजि केवलमभाजि गजेन शाखी नान्यस्य गंधमपि मानभृतः सहंते ४२।
भग्नीद्रकंजचरकुंजरगंडकोषसंक्रांतदानपयसो वनपादपस्य सेनागजेन मथितस्य
निजप्रसूनैर्मन्त्रेयथागतमगामिकुलैरलीनां ४३ नोच्चैर्यदा तरुतलेषु ममुस्तदानी
माधोरणेरभिहिताः पृथुमूलशाखाः बंधाय चिच्छिदुरिभास्तरसात्मनैव वन्यैवात्मनीनम
य वाक्किपतेमदांधैः ४४ उत्क्षेपणीकरमुचः प्रवलोष्मणेंतरूत्फुल्लनीलनलिनोदर
तुल्यभासः एकांतविशालाशीरसोरुरिचंदनेषु नागान्ववंधुरपरान्मनुजानिरासुः ४५
कंडूयतः कटभुवं करिणो मदेन स्कंधं सुगंधिमनुलीनवनानगस्य स्थूलेंद्रनील

माघ द्मादधानः ग्रीवाग्रलोलकलकिंकिणीकानिनादमिश्रं दधद्घ्राणघुर्घुरशब्दमश्वः
२९ ५७ उत्तापदर्प्पचलितेन सहैव रज्ज्वा कीलं प्रपत्य परमानवदुर्यहेण आकुल्प
कारिकटकस्तुरगेण तूर्णमश्वेति विद्रुतमनुद्रुवतान्यमश्वं ५८ अव्याकुलं प्रकृ
तमुत्तरधेयकर्मधाराः प्रसाधयितुमव्यतिकीर्णरूपाः सिद्धं मुखेन वसुवीथिषु
काश्चिदश्ववल्गाविभागकुशलो गमयांबभूव ५९ मुक्तास्तृणानि परितः कटकं
७२ चरंतस्तुः संदितानजनिकाव्यतिषंगभाजः सस्नुः सरोषपरिचारकवार्यमाणा दाम
चलस्खलितलोलपदं तुरंगाः ६० उत्तीर्णभारलघुनाप्यलघूलपोघसौहित्यनिस्स
हतरेण तरोरधस्तात् रोमंथमंथरचलद्गुरुसास्नमासांचक्रे निमीलदलसेक्षणमौ
क्षकेण ६१ मृत्पिंडशेखरितकोटिभिरर्द्धचंद्रं शृंगैः शिखाग्रगतलक्ष्ममलं हसाद्भिः माघ
उच्चक्नुरीताल्पवषभाः सरितां नदंतो रोधांसि धीरमवचस्करिरे महोक्षाः ६२ मेदस्वि २९

गजमंडलीकाभिरुच्चैर्नीलाभ्रपंक्तिपरिवेषमिवाधिजग्मुः ५१ गतस्वनमार्गगजयोपिग
नोरुमार्गाः स्वैरं समाचकृषिरे भुवि वेल्लनाय दर्प्पोदयोल्लालितफेनलवानुसारसंलक्ष्य
पल्लवपनवल्गिपदास्तुरंगाः ५२ आजिघ्रति प्रणतमूर्द्धनि वाल्हिजे श्वेतस्यांगसंगमसु
खानुभवोत्सुकायाः नासाविरोकपवनोल्लालितं तनीयो रोमांचतामिव जगाम रजः पृथि
व्याः ५३ हेम्नः स्थलीषु परितः परिवृत्य वाजी धुन्वन्वपुः प्रविततायतरोमपंक्तिः ज्वा
लाकणाकणरुचानिकरेण रेणोः शोभेण तेजस इवोल्लसता रराज ५४ दंतालिकाधर
णनिश्चलपाणियुग्ममर्द्धोदितो हरिरिवोदयशैलमूर्द्ध्नः सोकेन नाक्रमत वल्लभपात्
शुच्चैः श्रीवृक्षकी पुरुषको न्नामितास्यकायः ५५ रेजे जनैः स्नपनसान्द्रतरार्द्रमूर्त्तिर्द्दैवै
रिवानिमिषदृष्टिभिरीक्ष्यमाणः श्रीसन्निधानरमणीयतरोप्यवउच्चैरुच्चैः श्रवाजल
निधेरिव जातमात्रः ५६ अभ्याविभ्रामिपतिभिः क्षणवीतनिद्रैरस्मन्नुपरोहरितकंमु

माघ ३० वीरुहरवैः ६८ इतिश्रीशिशुपालवधे महाकाव्ये श्र्यंके माघकृतौ पर्वतोपरिसैन्यनि
वेशवर्णनंनाम पंचमः सर्गः ५ अथ रिरंसुममुं युगपद्गिरौ कृतयथास्वतरुप्रसवश्रिया
ऋतुगणेन निषेवितुमादधे भुवि पदं विपदंतकृतं सतां १ नवपलाशपलाशवनं पुरः
स्फुटपरागपरागतपंकजं मृदुलतांतलतांतमलोकयत्स सुरभिं सुरभिं सुमनोभरैः
२ विलुलितालकसंहतिरामृशन्मृगदृशां श्रमवारिललाटजं तनुतरंगततीः सरसां
दलत्कुवलयं वलयन्मरुदाववौ ३ तुलयति स्म विलोचनतारकाः कुरवकस्तवक
व्यतिषंगिणि गुणवदाश्रयलब्धगुणोदये मलिनि मालिनि माधवयोषितां ४ स्फु
टमिवोज्वलकांचनकांतिभिर्युतमशोकमशोभत चंपकैः विरहिणां हृदयस्य भिदाभृ
तः कपिशितं पिशितं मदनाग्निना ५ स्मरहुताशनमुर्मुरचूर्णतां दधुरिवाम्रवणस्य राम ३०
रजःकणाः निपतिताः परितः पथिकव्रजानुपरि ते परितेपुरतो भृशं ६ रतिपतिप्र

नः सरभसोपगताननभीकान्मंक्षापराननतुलोमकुराहवेन ऊर्जस्वलेन सुरभीननु निःसप
त्नं जग्मे जयोद्धुरविशालविषाणमुक्ष्णा ६३ विभ्राणमायतमतीमवधूयाशिरोधिं प्रस्थाः
यतामधिरसामधिकंदधंति लोलोष्ठमोष्ठकमुदग्रमुखं ततरूणमभ्रंलिहानिलीली
हेनवपल्लवानि ६४ सार्द्धं कथंचिदुचितैः पिचुमंदपत्रैरास्यांतरालगतमाम्रदलं म्रदी
यः दासेरकः सपदिसंवालितं निषादैर्विप्रं पुरापतगराडिवनिर्जगार ६५ स्पष्टं बहिः स्थि
तवतेपिनिवेदयंतस्त्वेष्टाविशेषमनुजीविजनायराज्ञो वैतालिकाः स्फुटपदप्रकटार्थमु
च्चैर्भोगावलीः कलगिरोवसरेषुपेठुः ६६ उन्नम्रताम्रपटमंडपमंडितं तदानीलनागकु
लसंकुलमावभासे संध्यांशुभिन्नघनकर्बुरितांतरिक्षलक्ष्मीविडंबिशिबिरं शिवकी।
र्त्तनस्य ६७ धरस्योद्धर्त्तासित्वमितिननुसर्वत्रजगतिप्रतीतस्तत्किंमाममतिभरमधः प्र
पायियिषुः उपालब्धेवोच्चैर्गिरिपतिरितिश्रीपतिमसौवलाक्रांतः क्रीडद्विरदमथितो

